# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा- आचार्य – २ | प्रश्नपत्रम् – ०२ | गुणाः – ७० |
| विषयः – नव्यव्याकरणम् | सत्रम्- ०४ (New) | समयः- ११:३० तः २:३० |
| दिनाङ्कः –२७/०३/२०२० | सन्दर्भग्रन्थः – परमलघुमञ्जुषा व्युत्पत्तिवादश्च | |

---

### प्रथमान्वितिः (Unit 1)
गुणाः

प्रश्नः १ नामार्थविषयकं मीमांसकमतं सप्रमाणं समुपस्थापनीयम्। ०५

अथवा

नामार्थविषयकं मीमांसकमतखण्डनपुरःसरं वैयाकरणमतं प्रस्तोतव्यम्।

प्रश्नः २ किं नाम परिनिष्ठितत्वम्? सोदाहरणम् उल्लेखनीयम्। १०

अथवा

कति नामार्थाः सन्ति? सप्रमाणं प्रस्तोतव्यम्?

### द्वितीयान्वितिः (Unit 2)

प्रश्नः ३ समासविषयकं वैयाकरणमतं समुपस्थापनीयम्। ०५

अथवा

आख्यातं तद्धितकृतोर्यत् किञ्चिद् उपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥
अस्याः कारिकायाः सप्रसङ्गं व्याख्या कार्या।

प्रश्नः ४ समासे शक्त्यस्वीकारे यथाधीतग्रन्थानुसारं प्रदत्ता आपत्तिः तत्समाधानञ्च प्रस्तोतव्यम्। १०

अथवा

समासविषयकं नैयायिकमतं समुपस्थापनीयम्।

### तृतीयान्वितिः (Unit 3)

प्रश्नः ५ न च 'पदार्थः पदार्थेनान्वेति' इति व्युत्पत्तिर्विरोधः, सम्पन्नो व्रीहिरित्यनेकव्रीहितात्पर्यकेप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात्। अस्य वाक्यस्य सप्रसङ्गं व्याख्या कार्या। ०५

अथवा

ननु 'विंशत्याद्याः सदैकत्वे' इत्यनुशासनात् 'शतं ब्राह्मणाः' इत्यादेः साधुत्वेऽपि 'वेदाः प्रमाणम्' इत्यादयः कथं प्रयोगाः? विशेष्यविशेषणवाचकपदयोरसति विशेषानुशासने समानवचनकत्वनियमात्, अन्यथा 'घटाः नीलः' इत्यादेरपि साधुताप्रसङ्गात्। अस्य वाक्यस्य सप्रसङ्गं व्याख्या कार्या।

प्रश्नः ६ ‘साजात्यञ्च विभक्तिविभाजकप्रथमात्वादिना न तु समानानुपूर्विकत्वम् साजात्यम्’ १०
अस्याः पङ्क्तेः सप्रसङ्गं व्याख्या कार्या।

अथवा

**‘नीलो घटः’ इत्यत्र विशेष्यविशेषणयोः समानवचनत्वनियमे अपि समानवचनत्वं तथा परिष्कुरुत यथा ‘वेदाः प्रमाणम्’ इत्यत्र प्रसक्तिर्न स्यात्।**

## चतुर्थान्वितिः (Unit 4)

प्रश्नः ७ **प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे तत्र ल्युडादेरधिकरणपरत्वेऽपि तथाविधान्वयबोधापत्तेः। कस्यचित् प्रतिबन्धकतां कल्पयित्वा तद्वारणे च गौरवात्।** अस्य वाक्यस्य सप्रसङ्गं व्याख्या कार्या। ०५

अथवा

**अभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिः। घटो घटः दण्डवान् दण्डवान् पाकं पचति इत्यादौ घटत्वदण्डवत्त्वपाकत्वाद्यवच्छिन्ने तत्तद्रूपावच्छिन्नस्य तथाविधान्वयबोधानुदयात् ।** अस्य सप्रसङ्गं व्याख्या कार्या।

प्रश्नः ८ **क्रियाविशेषणानाम् अभेदान्वयाकाङ्क्षास्वरूपं निरूपयत।** १०

अथवा

**‘घटो घटः’ इत्यत्र शाब्दबोधवारणाय व्युत्पत्तिवादकर्त्रा किमुक्तम्? तत्सर्वं निरूपणीयम्।**

प्रश्नः ९ **दशानां प्रश्नानाम् एकैकवाक्यैः उत्तराणि लेख्यानि।** १०

१ मीमांसकमते कः नामार्थः?
२ वैयाकरणमते कः नामार्थः
३ ‘आदिर्ञिटुडवः’ सूत्रमिदं कस्य प्रातिपदिकार्थत्वे प्रमाणम्?
४ अनुकरणाऽनुकार्ययोः अभेदविवक्षापक्षस्य किम् उदाहरणम्?
५ वैयाकरणानुसारं कति वृत्तयः सन्ति?
६ अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वं किं भवति?
७ अवयवार्थ-संवलित-समुदायार्थबोधिकत्वं किं भवति?
८ शब्दः कतिविधः?
९ व्युत्पत्तिवादस्य कः रचनाकारः?
१० व्युत्पत्तिवादस्य का व्युत्पत्तिः?
११ भेदाऽभेदयोर्मध्ये ‘वेदाः प्रमाणम्’ कस्य उदाहरणम्?
१२ प्रमितिकरणं किं भवति?
१३ क्रियाविशेषणे किं लिङ्गं भवति?
१४ क्रियाविशेषणे किं कारकं भवति?
१५ ‘स्तोकः पाकः’ इत्यत्र क्रियाविशेषणे नपुंसकलिङ्गं कथं न भवति?

*************************